श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ अष्टचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अष्टचत्वारिंशः सर्गः ॥

## इन्द्रजिद्धनुमतोर्युद्धमिन्द्रजिद्दिव्यास्त्रबन्धनबद्धस्य हनुमतो रावणस्य राजसभायां गमनम्

ततस्तु रक्षोऽधिपतिर्महात्मा
हनूमताक्षे निहते कुमारे।
मनः समाधाय स देवकल्पं
समादिदेशेन्द्रजितं सरोषः॥ **5.48.1** ॥

त्वमस्त्रविच्छस्त्रभृतां वरिष्ठः
सुरासुराणामपि शोकदाता।
सुरेषु सेन्द्रेषु च दृष्टकर्मा
पितामहाराधनसञ्चितास्त्रः॥ **5.48.2** ॥

त्वदस्त्रबलमासाद्य ससुराः समरुद्गणाः।
न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः॥ **5.48.3** ॥

न कश्चित् त्रिषु लोकेषु संयुगेन गतश्रमः।
भुजवीर्याभिगुप्तश्च तपसा चाभिरक्षितः।
देशकालप्रधानश्च त्वमेव मतिसत्तमः॥ **5.48.4** ॥

न तेऽस्त्यशक्यं समरेषु कर्मणां
न तेऽस्त्यकार्यं मतिपूर्वमन्त्रणे।
न सोऽस्ति कश्चित् त्रिषु सङ्ग्रहेषु वै
न वेद यस्तेऽस्त्रबलं बलं च ते॥ **5.48.5** ॥

ममानुरूपं तपसो बलं च ते
    पराक्रमश्चास्त्रबलं च संयुगे।
न त्वां समासाद्य रणावमर्दे
    मनः श्रमं गच्छति निश्चितार्थम्॥ **5.48.6**॥

निहताः किङ्कराः सर्वे जम्बुमाली च राक्षसः।
अमात्यपुत्रा वीराश्च पञ्च सेनाग्रगामिनः॥ **5.48.7**॥

बलानि सुसमृद्धानि साश्वनागरथानि च।
सहोदरस्ते दयितः कुमारोऽक्षश्च सूदितः।
न तु तेष्वेव मे सारो यस्त्वय्यरिनिषूदन॥ **5.48.8**॥

इदं च दृष्ट्वा निहतं महद् बलं
    कपेः प्रभावं च पराक्रमं च।
त्वमात्मनश्चापि निरीक्ष्य सारं
    कुरुष्व वेगं स्वबलानुरूपम्॥ **5.48.9**॥

बलावमर्दस्त्वयि सन्निकृष्टे
    यथा गते शाम्यति शान्तशत्रौ।
तथा समीक्ष्यात्मबलं परं च
    समारभस्वास्त्रभृतां वरिष्ठ॥ **5.48.10**॥

न वीर सेना गणशश्च्यवन्ति
    न वज्रमादाय विशालसारम्।
न मारुतस्यास्ति गतिप्रमाणं
    न चाग्निकल्पः करणेन हन्तुम्॥ **5.48.11**॥

तमेवमर्थं प्रसमीक्ष्य सम्यक्
    स्वकर्मसाम्याद्धि समाहितात्मा।

स्मरंश्च दिव्यं धनुषोऽस्य वीर्यं
    व्रजाक्षतं कर्म समारभस्व ॥ **5.48.12** ॥

न खल्वियं मतिश्रेष्ठ यत्त्वां सम्प्रेषयाम्यहम्।
इयं च राजधर्माणां क्षत्रस्य च मतिर्मता ॥ **5.48.13** ॥

नानाशस्त्रेषु सङ्ग्रामे वैशारद्यमरिन्दम।
अवश्यमेव बोद्धव्यं काम्यश्च विजयो रणे ॥ **5.48.14** ॥

ततः पितुस्तद् वचनं निशम्य
    प्रदक्षिणं दक्षसुतप्रभावः।
चकार भर्तारमतित्वरेण
    रणाय वीरः प्रतिपन्नबुद्धिः ॥ **5.48.15** ॥

ततस्तैः स्वगणैरिष्टैरिन्द्रजित् प्रतिपूजितः।
युद्धोद्धतकृतोत्साहः सङ्ग्रामं सम्प्रपद्यत ॥ **5.48.16** ॥

श्रीमान् पद्मविशालाक्षो राक्षसाधिपतेः सुतः।
निर्जगाम महातेजाः समुद्र इव पर्वणि ॥ **5.48.17** ॥

स पक्षिराजोपमतुल्यवेगै -
    र्व्याघ्रैश्चतुर्भिः स तु तीक्ष्णदंष्ट्रैः।
रथं समायुक्तमसह्यवेगः
    समारुरोहेन्द्रजिदिन्द्रकल्पः ॥ **5.48.18** ॥

स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोऽस्त्रविदां वरः।
रथेनाभिययौ क्षिप्रं हनूमान् यत्र सोऽभवत् ॥ **5.48.19** ॥

स तस्य रथनिर्घोषं ज्यास्वनं कार्मुकस्य च।
निशम्य हरिवीरोऽसौ सम्प्रहृष्टतरोऽभवत् ॥ **5.48.20** ॥

इन्द्रजिच्चापमादाय शितशल्यांश्च सायकान्।
हनूमन्तमभिप्रेत्य जगाम रणपण्डितः॥ **5.48.21** ॥

तस्मिंस्ततः संयति जातहर्षे
रणाय निर्गच्छति बाणपाणौ।
दिशश्च सर्वाः कलुषा बभूवु -
र्मृगाश्च रौद्रा बहुधा विनेदुः॥ **5.48.22** ॥

समागतास्तत्र तु नागयक्षा
महर्षयश्चक्रचराश्च सिद्धाः।
नभः समावृत्य च पक्षिसङ्घा
विनेदुरुच्चैः परमप्रहृष्टाः॥ **5.48.23** ॥

आयान्तं स रथं दृष्ट्वा तूर्णमिन्द्रध्वजं कपिः।
ननाद च महानादं व्यवर्धत च वेगवान्॥ **5.48.24** ॥

इन्द्रजित् स रथं दिव्यमाश्रितश्चित्रकार्मुकः।
धनुर्विस्फारयामास तडिदूर्जितनिःस्वनम्॥ **5.48.25** ॥

ततः समेतावतितीक्ष्णवेगौ
महाबलौ तौ रणनिर्विशङ्कौ।
कपिश्च रक्षोऽधिपतेस्तनूजः
सुरासुरेन्द्राविव बद्धवैरौ॥ **5.48.26** ॥

स तस्य वीरस्य महारथस्य
धनुष्मतः संयति सम्मतस्य।
शरप्रवेगं व्यहनत् प्रवृद्ध -
श्चचार मार्गे पितुरप्रमेयः॥ **5.48.27** ॥

ततः शरानायततीक्ष्णशल्यान्
    सुपत्रिणः काञ्चनचित्रपुङ्खान्।
मुमोच वीरः परवीरहन्ता
    सुसन्ततान् वज्रसमानवेगान्॥ **5.48.28** ॥

ततः स तत्स्यन्दननिःस्वनं च
    मृदङ्गभेरीपटहस्वनं च।
विकृष्यमाणस्य च कार्मुकस्य
    निशम्य घोषं पुनरुत्पपात॥ **5.48.29** ॥

शराणामन्तरेष्वाशु व्यावर्तत महाकपिः।
हरिस्तस्याभिलक्ष्यस्य मोक्षयन् लक्ष्यसङ्ग्रहम्॥ **5.48.30** ॥

शराणामग्रतस्तस्य पुनः समभिवर्तत।
प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः॥ **5.48.31** ॥

तावुभौ वेगसम्पन्नौ रणकर्मविशारदौ।
सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमम्॥ **5.48.32** ॥

हनूमतो वेद न राक्षसोऽन्तरं
    न मारुतिस्तस्य महात्मनोऽन्तरम्।
परस्परं निर्विषहौ बभूवतुः
    समेत्य तौ देवसमानविक्रमौ॥ **5.48.33** ॥

ततस्तु लक्ष्ये स विहन्यमाने
    शरेष्वमोघेषु च सम्पतत्सु।
जगाम चिन्तां महतीं महात्मा
    समाधिसंयोगसमाहितात्मा॥ **5.48.34** ॥

ततो मतिं राक्षसराजसूनु -
श्चकार तस्मिन् हरिवीरमुख्ये।
अवध्यतां तस्य कपेः समीक्ष्य
कथं निगच्छेदिति निग्रहार्थम्॥ **5.48.35** ॥

ततः पैतामहं वीरः सोऽस्त्रमस्त्रविदां वरः।
सन्दधे सुमहातेजास्तं हरिप्रवरं प्रति॥ **5.48.36** ॥

अवध्योऽयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित्।
निजग्राह महाबाहुं मारुतात्मजमिन्द्रजित्॥ **5.48.37** ॥

तेन बद्धस्ततोऽस्त्रेण राक्षसेन स वानरः।
अभवन्निर्विचेष्टश्च पपात च महीतले॥ **5.48.38** ॥

ततोऽथ बुद्ध्वा स तदस्त्रबन्धं
प्रभोः प्रभावाद् विगताल्पवेगः।
पितामहानुग्रहमात्मनश्च
विचिन्तयामास हरिप्रवीरः॥ **5.48.39** ॥

ततः स्वायम्भुवैर्मन्त्रैर्ब्रह्मास्त्रं चाभिमन्त्रितम्।
हनूमांश्चिन्तयामास वरदानं पितामहात्॥ **5.48.40** ॥

न मेऽस्य बन्धस्य च शक्तिरस्ति
विमोक्षणे लोकगुरोः प्रभावात्।
इत्येवमेवं विहितोऽस्त्रबन्धो
मयाऽऽत्मयोनेरनुवर्तितव्यः॥ **5.48.41** ॥

स वीर्यमस्त्रस्य कपिर्विचार्य
पितामहानुग्रहमात्मनश्च।

विमोक्षशक्तिं परिचिन्तयित्वा
    पितामहाज्ञामनुवर्तते स्म ॥ **5.48.42** ॥

अस्त्रेणापि हि बद्धस्य भयं मम न जायते।
पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च ॥ **5.48.43** ॥

ग्रहणे चापि रक्षोभिर्महन्मे गुणदर्शनम्।
राक्षसेन्द्रेण संवादस्तस्माद् गृह्णन्तु मां परे ॥ **5.48.44** ॥

स निश्चितार्थः परवीरहन्ता
    समीक्ष्यकारी विनिवृत्तचेष्टः।
परैः प्रसह्याभिगतैर्निगृह्य
    ननाद तैस्तैः परिभर्त्स्यमानः ॥ **5.48.45** ॥

ततस्ते राक्षसा दृष्ट्वा विनिश्चेष्टमरिन्दमम्।
बबन्धुः शणवल्कैश्च द्रुमचीरैश्च संहतैः ॥ **5.48.46** ॥

स रोचयामास परैश्च बन्धं
    प्रसह्य वीरैरभिगर्हणं च।
कौतूहलान्मां यदि राक्षसेन्द्रो
    द्रष्टुं व्यवस्येदिति निश्चितार्थः ॥ **5.48.47** ॥

स बद्धस्तेन वल्केन विमुक्तोऽस्त्रेण वीर्यवान्।
अस्त्रबन्धः स चान्यं हि न बन्धमनुवर्तते ॥ **5.48.48** ॥

अथेन्द्रजित् तं द्रुमचीरबद्धं
    विचार्य वीरः कपिसत्तमं तम्।
विमुक्तमस्त्रेण जगाम चिन्ता -
    मन्येन बद्धोऽप्यनुवर्ततेऽस्त्रम् ॥ **5.48.49** ॥

अहो महत् कर्म कृतं निरर्थं
न राक्षसैर्मन्त्रगतिर्विमृष्टा।
पुनश्च नास्त्रे विहतेऽस्त्रमन्यत्
प्रवर्तते संशयिताः स्म सर्वे॥ **5.48.50** ॥

अस्त्रेण हनुमान् मुक्तो नात्मानमवबुध्यते।
कृष्यमाणस्तु रक्षोभिस्तैश्च बन्धैर्निपीडितः॥ **5.48.51** ॥

हन्यमानस्ततः क्रूरै राक्षसैः कालमुष्टिभिः।
समीपं राक्षसेन्द्रस्य प्राकृष्यत स वानरः॥ **5.48.52** ॥

अथेन्द्रजित् तं प्रसमीक्ष्य मुक्त -
मस्त्रेण बद्धं द्रुमचीरसूत्रैः।
व्यदर्शयत् तत्र महाबलं तं
हरिप्रवीरं सगणाय राज्ञे॥ **5.48.53** ॥

तं मत्तमिव मातङ्गं बद्धं कपिवरोत्तमम्।
राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन्॥ **5.48.54** ॥

कोऽयं कस्य कुतो वापि किं कार्यं कोऽभ्युपाश्रयः।
इति राक्षसवीराणां दृष्ट्वा सञ्जज्ञिरे कथाः॥ **5.48.55** ॥

हन्यतां दह्यतां वापि भक्ष्यतामिति चापरे।
राक्षसास्तत्र सङ्क्रुद्धाः परस्परमथाब्रुवन्॥ **5.48.56** ॥

अतीत्य मार्गं सहसा महात्मा
स तत्र रक्षोऽधिपपादमूले।
ददर्श राज्ञः परिचारवृद्धान्
गृहं महारत्नविभूषितं च॥ **5.48.57** ॥

स ददर्श महातेजा रावणः कपिसत्तमम्।
रक्षोभिर्विकृताकारैः कृष्यमाणमितस्ततः॥ **5.48.58**॥

राक्षसाधिपतिं चापि ददर्श कपिसत्तमः।
तेजोबलसमायुक्तं तपन्तमिव भास्करम्॥ **5.48.59**॥

स रोषसंवर्तितताम्रदृष्टि -
दर्शाननस्तं कपिमन्ववेक्ष्य।
अथोपविष्टान् कुलशीलवृद्धान्
समादिशत् तं प्रति मुख्यमन्त्रीन्॥ **5.48.60**॥

यथाक्रमं तैः स कपिश्च पृष्टः
कार्यार्थमर्थस्य च मूलमादौ।
निवेदयामास हरीश्वरस्य
दूतः सकाशादहमागतोऽस्मि॥ **5.48.61**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टचत्वारिंशः सर्गः॥